श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हयग्रीवपञ्जरम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हयग्रीवपञ्जरम् ॥

अथ कल्पं प्रवक्ष्यामि हयग्रीवस्य पञ्जरम्।
यस्य विज्ञानमात्रेण वाणी गङ्गेव निस्सरेत्॥ 1 ॥

शुद्धस्फटिकसङ्काशं तुषाराचलसन्निभम्।
श्वेतपर्वतसङ्काश चन्द्रमण्डल मध्यगम्॥ 2 ॥

चतुर्भुजमुदाराङ्गं पुण्डरीकायतेक्षणम्।
शङ्खचक्रधरं देवं किरीटमकुटोज्ज्वलम्॥ 3 ॥

कौस्तुभोद्भासितोरस्कं वनमालाविराजितम्।
पीताम्बरधरं देवं श्रीवत्साङ्कितवक्षसम्॥ 4 ॥

मुख्यहस्तद्वयेनैव ज्ञानमुद्राक्षपुस्तकम्।
धारयन्तं हयग्रीवं ध्यायेदिष्टार्थसिद्धये॥ 5 ॥

ओंकारोद्गीथरूपाय ऋग्यजुस्साममूर्तये।
नमोऽस्तु देवदेवाय वाञ्छितार्थप्रदायिने॥ 6 ॥

अज्ञानतिमिरं छिन्धि ज्ञानं चाशु प्रयच्छ मे।
देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते॥ 7 ॥

भूतप्रेतपिशाचादीन् छिन्धि देव जनार्दन।
ज्वरादीन् निखिलान् रोगान् नाशयाऽऽशु रमापते॥ 8 ॥

दारिद्र्यं सकलं छिन्धि कुरु सौभाग्यभाजनम्।
शत्रून्नाशय मे देव हयशीर्ष नमोऽस्तु ते॥ 9 ॥

मेधां प्रज्ञां बलं विद्यां संपदं पुत्रपौत्रकम्।
देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते॥ **10** ॥

कार्कोटकमुखान् सर्पान् विषादीन् विलयं नय।
अमृतं कुरु मे देव हयशीर्ष नमोऽस्तुते॥ **11** ॥

स्त्रीवश्यं जनवश्यं च राजवश्यं परात्परम्।
कुरु देवाङ्गनाबृन्दसेव्यमानपदाम्बुज॥ **12** ॥

हंसाय परमेशाय चन्द्रमण्डलवासिने।
नमो हयोत्तमाङ्गाय वाञ्छितार्थप्रदायिने॥ **13** ॥

ऋग्यजुस्सामरूपाय ऋताय महते नमः।
ऋक्षेशबिन्दुमध्यस्थराजीवासनभाजिने॥ **14** ॥

वेदवेदान्तवेद्याय वेदाहरणकर्मणे।
सत्त्वासत्त्वमहामोहभेदिने ब्रह्मणे नमः॥ **15** ॥

प्रज्ञानदायिने नित्यं भजतां भावितात्मनाम्।
प्रणवोद्गीथवपुषे प्रणतिं प्रतिपादये॥ **16** ॥

मन्दारकुन्दस्फटिकमहनीयोरुवर्चसे।
मनीषाप्रददेवाय महाश्वशिरसे नमः॥ **17** ॥

इति द्वादशमन्त्रेण नमस्कुर्याज्जनार्दनम्।
प्रातः प्रसन्नवदनं पूर्वाचार्याभिवन्दितम्॥ **18** ॥

॥ श्री हयग्रीवपञ्जरं समाप्तम्॥